# संस्कृत वार्ता:

दिनाङ्क : 29/04/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना मेरठ-नगरं प्रयागराज-नगरेण सह योजयितुं चतुर्णवत्यधिक पञ्चशत कि. मी. सुदीर्घः गङ्गा-द्रुतमार्गः उद्घाटितः।
- श्रीमोदिना उक्तं यत्, द्रुतमार्गः गङ्गानद्याः इव नूतना जीवनरेखा भविष्यति।
- सर्वकारेण जैवेन्धनस्य उपयोगं वर्धनाय, उत्सर्जननियमानां मानकीकरणं च कर्तुं इन्धनवर्गीकरणे संशोधनं कुर्वता केन्द्रीय-मोटर्-यान-नियमान् निरूपयन्तः प्रारूप-सूचनाः प्रसारिताः।
- आई. पी. एल. क्रिकेट-क्रीडायां मुम्बई इण्डियन्स दलम् अद्य सायङ्काले वानखेडे-क्रीडाङ्गणे सनराईजर्स-हैदराबाद दलं सम्मुखी करिष्यति।

---------------------------------------------------------

<u>प्रधानमन्त्री- हरदोई</u>

प्रधानमन्त्री नरेन्द्रमोदी उत्तरप्रदेशस्य हरदोई-मण्डले चतुर्नवत्यधिक पञ्चशत कि. मी. सुदीर्घस्य गङ्गा-द्रुतमार्गस्य उद्घाटनम् अकरोत्। जनसमूहं सम्बोधयन् प्रधानमन्त्री श्रीमोदी अवदत् यत्, गङ्गा यथा सहस्रवर्षाणि यावत् उत्तरप्रदेशस्य जीवनरेखा अस्ति, तथैव एषः द्रुतमार्गोपि अस्य राज्यस्य विकासस्य नूतन-जीवनरेखा भविष्यति।

श्रीमोदी अवदत् यत् आधारभूतसंरचनाः देशस्य द्रुततरां प्रगतीं महत्त्वाकांक्षां च प्रतिबिम्बयन्ति। सः अवदत् यत् गङ्गा-द्रुतमार्गः उत्तरप्रदेशस्य एकं क्षेत्रं अन्येन क्षेत्रेण सह संयोजयति, येन क्षेत्रीय-सम्पर्कः महत्त्वपूर्णरूपेण संवर्धितः भवति। सः अग्रे अवदत् यत् एषा परियोजना राष्ट्रियराजधानीक्षेत्रस्य विशालान् अवसरान् परियोजनान् च राज्यस्य विभिन्नेषु भागेषु आनेष्यति। दीर्घकालं यावत् अस्य प्रदेशस्य जीवनरेखायाः गङ्गानद्याः ऐतिहासिकं महत्त्वं प्रकाशयन्, प्रधानमन्त्री अवदत् यत् तस्य समीपस्थात् आधुनिक-द्रुतमार्गाः विकासस्य नूतनाः

धमनयः भवन्ति। एतादृशाः परियोजनाः उत्तरप्रदेशस्य विकासाय, भारतस्य उज्ज्वल-भविष्याय च महत्त्वपूर्णां भूमिकां निर्वहन्ति इति सः अवधानं दत्तवान्।

नारीशक्ति-वन्दन्-अधिनियमस्य विरुद्धे समाजवादीति दलस्य प्रधानमन्त्रिणा निन्दाकृता। अस्मिन् अवसरे मुख्यमन्त्री योगी आदित्यनाथः अवदत् यत्, प्रधानमन्त्रिणः दूरदृष्टेः अन्तर्गतं राज्ये उन्नतसंरचनायाः विकासः अभवत्। सः अवदत् यत् विगतेषु नव वर्षेषु राज्ये चतुर्लक्ष कि. मी. मार्गनिर्माणस्य विकासः अभवत्। उत्तरप्रदेश-एक्स्प्रेस्-वे-औद्योगिक-विकास-प्राधिकरणेन विकसित द्रुत-मार्गः, राज्यस्य पश्चिम-मध्य-पूर्व-प्रदेशान् एकेन द्रुत-मार्गेण योजयिष्यति। राज्यस्य दीर्घतमः द्रुतमार्गः मेरठ-प्रयागराजयोः मध्ये यात्राकालम् प्रायः द्वादश होरात् प्रायः षट् होरापर्यन्तं न्यूनीकर्तुं शक्नोति।

प्रधानमन्त्री उत्तरप्रदेशस्य द्वि-दिवसीय-यात्रायाः द्वितीयदिने प्रातःकाले श्री-काशी-विश्वनाथ-मन्दिरं प्राप्य गर्भगृहे विधिवत् दर्शनं कृत्वा प्रार्थनां अकरोत्। मन्दिरात् बहिः आगमनसमये भारतीय-जनता-पार्टीतिदलस्य नेतारः तस्मै डमरु-त्रिशूलयोः उपहारं समर्पितवन्तः। ततः प्रधानमन्त्री मन्दिर-परिसरे स्थापितां विक्रमादित्य-वैदिक-घटिकां अपि अवलोकितवान्। अत्रैव सः उपस्थितैः कतिपयैः भक्तजनैः सह संवादं कृतवान्।

------------------------------------------------------------

## मोटर्-यान-नियमः

सर्वकारेण ऊननवत्यधिक ऊनविंशतिशत तमस्य केन्द्रीय-मोटर्-यान-नियमस्य प्रस्तावित-संशोधनानि निरूपयन् प्रारूप-सूचनाप्रकटिता अस्ति। सद्यैव प्रसारितस्याः अधिसूचनायाः अनुसारं, सर्वकारेण उच्च-इथेनाल् तथा जैव-इन्धन-सम्मिश्रण-लक्ष्याणाम् अनुरूपं, उत्सर्जनस्य प्रकार-अनुमोदनस्य च मानदण्डस्य अन्तर्गतं तान्त्रिक-इन्धन-वर्गीकरणे अद्यतनानां प्रारूपस्य प्रस्तावः प्रस्तावितः अस्ति। प्रारूपः अनेकानि प्रमुखानि परिवर्तनानि निरूपयति। हाईड्रोजन्-इन्धन-वाहनानां वर्गीकरणं हाईड्रोजन्-प्लस् सी. एन्. इत्यतः हाईड्रोजन्-प्लस् सी. एन्. जी. इत्यनेन संशोधितम्। E-20 इन्धनेन सह संरेखितरूपेण, विशिष्ट-वर्गे स्थूल-वाहन-भारस्य सीमा त्रिसहस्र-किलोग्राम्-तः सार्द्धत्रिसहस्र-किलोग्राम्-पर्यन्तं वर्धितम् अस्ति।

------------------------------------------------------------

**पश्चिमबङ्गाल-निर्वाचनस्य**

पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय मतदानम् समाप्तम्। अस्मिन् चरणे सप्तमण्डलेषु आहत्य द्विचत्वारिन्शदधिकैक शतासनानां कृते मतदानम् अभवत्। अन्तिम सूचना प्राप्तिं यावत् प्रायः नवति प्रतिशतं यावत् मतदानम् अभिलिखितम्। अद्य सायङ्काले षट् वादन पर्यन्तं मतदानम् अनुवर्तते। कोलकाता, हावडा, 24 परगना इत्येतेषु मण्डलेषु मतदातृणां दीर्घ-पङ्क्तयः दृश्यन्ते। राज्ये मतदानं बहुधा शान्तम् एव आसीत्। शान्तिपूर्णरीत्या मतदानं सुनिश्चेतुं पर्याप्त-सुरक्षा-व्यवस्था कृता अस्ति, यद्यपि बारानगरे ई. वी. एम्-दोषस्य, नादिया-नगरे भाजपेति दलस्य मतदानाभिकर्तोः व्रयणस्य च पृथक्-पृथक् घटनायाः सूचनाः प्राप्ताः सन्ति।

---

**पश्चिम-एशिया**

सर्वकारेण अद्य आश्वास्तिम् यत् पश्चिम-एशियायाः स्थितौ, देशीय-एल. पी. जी. आपूर्तिः सम्पूर्णे देशे कस्यापि बाधया विनैव सुगमतया प्रचलति। नवदिल्ल्याम् अन्तर्मन्त्रालयीयं वार्तालापं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य सचिवः सुजाता शर्मा इत्येषा अवदत् यत् देशे एल्. पी. जी.-वितरकानां कृते कुत्रापि शुष्कतायाः सूचना नास्ति। सा अग्रे अवोचत् यत् आनलाईन एल्. पी. जी. आरक्षणं तथा वितरण-प्रमाणन-कोड्-आधारितानि देशीय-एल्. पी. जी. आपूर्तयः अपि सर्वकालिकं उच्चस्तरे एव सन्ति।

---

**जयशङ्करः**

विदेश-मन्त्री डॉ. एस्. जयशङ्करः अद्य उक्तवान् यत् भारतीयकूटनीतिः राष्ट्रिय-हितं संवर्धनाय, अस्थिर-अशान्त-वैश्विक-परिस्थितौ च राष्ट्रिय-लक्ष्याणां सिद्धये पूर्णतया सज्जः अस्ति। सः नवदिल्ल्यां एकादश-योजनायाः प्रमुख-सम्मेलने भारतीय-उच्चायुक्तान्, राजदूतान्, विदेश-मन्त्रालयस्य वरिष्ठाधिकारिणश्च सम्बोधितवान्। सामाजिक-माध्यमे प्रेषिते सन्देशे डॉ.

जयशङ्करः अवदत् यत् एषः वार्तालापः भारतस्य वैश्विक-सहभागित्वस्य महत्त्वपूर्णं विस्तारं सुस्पष्टतया रेखांकितं करोति।

-----------------------------------------------------------

<u>अमरनाथ-यात्रा</u>

जम्मू-कश्मीरस्य उपराज्यपालः मनोज-सिन्हा अद्य जम्मू-नगरस्य लोकभवने उच्च-स्तरीय-सुरक्षा-समीक्षा-सभायाः अध्यक्षतां कृतवान्। अस्यां सभायां विद्यमान-सुरक्षा-स्थितेः मूल्याङ्कनम् अभवत् तथा च आगामि-अमरनाथ-यात्रा-सज्जतायाः समीक्षा जाता । अस्मिन् अवसरे वरिष्ठाः आरक्षी-प्रशासनिकाधिकारिणः, आरक्षी-महानिदेशकः नलिन-प्रभातः च सह उपस्थिताः आसन्।

-----------------------------------------------------------

<u>आईपीएल</u>

आई.पी.एल. क्रिकेट-क्रीडायां अद्य सायं सार्धसप्तवादने मुंबई-नगरस्य वानखेडे-क्रीडाङ्गणे मुंबई-इण्डियन्स-दलं सनराइजर्स-हैदराबाद-दलं च सम्मुखीकरिष्यतः। गतरात्रौ चण्डीगढ-नगरे सम्पन्ने क्रीडास्पर्धायां राजस्थान-रॉयल्स-दलेन पंजाब-किंग्स-दलम् षट्-स्तोभैः पराजितम्।

।। इति वार्ताः ।।